अथर्व्वशिरसोपेतो वेदान्ताभ्यासतत्परः ।
यमान् सेवेत सततं नियमांश्चाप्यतन्द्रितः ॥
कृष्णाजिनी सोत्तरीयः शुक्लयज्ञोपवीतवान् ।
अथवाग्नीन् समारोप्य स्वात्मनि ध्यानतत्परः ॥
अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत् ।
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ।
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ॥
प्रतिगृह्य पुटेनैव पाणिना सकलेन वा ।
विविधाश्चोपनिषद आत्मसंसिद्धये जपेत् ॥
विद्याविशेषान् सावित्रीं रुद्राध्यायं तथैव च ।
महाप्रास्थानिकश्चासौ कुर्य्यादनशनन्तथा ॥
अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्थितः ॥
ये तु सम्यगिममाश्रमं शिव-
माश्रयन्त्यशिवपुञ्जनाशनम् ।
ते विशन्ति परमेश्वरं परं
यान्ति चैव जगतोऽस्य संस्थितिम् ॥"

इति कूर्म्मपुराणे उपविभागे २६ अध्यायः ॥ अन्यत् विष्णुपुराणे ३ अंशे ९ अध्याये द्रष्टव्यम् ॥

वानरः, पुं, स्त्री, ( वा विकल्पितो नरः । यद्वा, वानं वने भवं फलादिकं रातीति । रा+कः । ) स्वनामख्यातपशुः । बाँदर इति भाषा । तत्पर्य्यायः । कपिः २ प्लवङ्गः ३ प्लवगः ४ शाखामृगः ५ वलीमुखः ६ मर्कटः ७ कीशः ८ वनौकाः ९ । इत्यमरः ॥ मर्कः १० प्लवः ११ प्रवङ्गः १२ प्रवगः १३ प्लवङ्गमः १४ प्रवङ्गमः १५ गोलाङ्गूलः १६ कपित्थास्यः १७ दधिशोणः १८ हरिः १९ तरुमृगः २० नगाटनः २१ झम्पी २२ झम्पारुः २३ कलिप्रियः २४ । इति शब्दरत्नावली ॥ किखिः २५ शालावृकः २६ इति जटाधरः ॥ ( एतद्धनने प्रायश्चित्तं यथा, मनुः । ११ । १३६ ।
"हत्वा हंसं बलाकाञ्च वकं बर्हिणमेव ।
वानरं श्येनभासौ च स्पर्शयेत् ब्राह्मणाय
गाम् ॥")

वानरप्रियः, पुं, (वानराणां प्रियः ।) क्षीरिवृक्षः । इति रत्नमाला ॥

वानराक्षः, पुं, ( वानराणामक्षिणीव अक्षिणी यस्य ।) वनच्छागः । इति हारावली ॥

वानराघातः, पुं, ( वानराणामाघातो यत्र । ) लोध्रवृक्षः । इति शब्दचन्द्रिका ॥

वानरी, स्त्री, (वानरस्य स्त्री । ङीष् ।) मर्कटी । ( यथा, कथासरित्सागरे । १२३ । ६२ ।
"अथावतीर्य्य वृक्षात् तौ वानरो वानरी च सा ।
अवतीर्णस्य मे पादावगृह्णीतामुभावपि ॥")
शूकशिम्बी । इति शब्दरत्नावली ॥ ( वानरस्येयमिति । वानर+अण्+ङीष् । वानरसम्बन्धिनी । यथा, महानाटके ।
"सुग्रीवे करुणा न सा हि करुणा लभ्या धरा
वानरी ।
मय्येषा करुणा तवैव भविता नो वा भवेत्
कुत्रचित् ॥")

वानरेन्द्रः, पुं, (वानराणामिन्द्रः ।) सुग्रीवः । इति शब्दरत्नावली ॥

वानलः, पुं, वावरः । इति शब्दचन्द्रिका ॥ कृष्णवावुइ इति ख्यातः ॥

वानस्पत्यः, पुं, ( वनस्पतौ भवः । वनस्पति+"दित्यदित्यादित्येति ।" ४ । १ । ८५ । ण्यः । ) पुष्पजातफलवृक्षः । स तु आम्रजम्बादिः । इत्यमरः ॥ ( वनस्पतीनां समूहः । "दित्यदित्येति ।" ण्यः । वनस्पतिसमूहे, क्ली । इति काशिका ॥ वनस्पतिजाते, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १४ ।
"अद्रिरसि वानस्पत्यः ।"
"हे उदूखल त्वं यद्यपि वानस्पत्यः दारुमयस्तथापि दृढत्वात् अद्रिरसि ।" इति तद्भाष्ये महीधरः ॥ यथा च, महाभारते ।३।१२१।४।
"तस्य सप्तसु यज्ञेषु सर्व्वमासीद्धिरण्मयम् ।
वानस्पत्यञ्च भौमञ्च यद्द्रव्यं नियतं मखे ।
चषालयूपचमसाः स्थाल्यः पात्र्यः स्रुचः
स्रुवाः ॥")

वाना, स्त्री, वर्त्तिकापक्षी । इति जटाधरः ॥

वानायुः, पुं, देशविशेषः । स तु भारतवर्षस्य उत्तरपश्चिमे वर्त्तते । इति शब्दरत्नावली ॥

वानायुजः, पुं, ( वनायौ देशविशेषे जायते इति । जन्+डः । ) वनायुदेशोत्पन्नघोटकः । इत्यमरः ॥

वानीरः, पुं, वेतसवृक्षः । इत्यमरः ॥ वाञ्जुल इति ख्यातवृक्षश्च । तत्पर्य्यायः । वृत्तपुष्पः २ शाखालः ३ जलवेतसः ४ व्याधिघातः ५ परिव्याधः ६ नादेयः ७ जलसम्भवः ८ । अस्य गुणाः । तिक्तत्वम् । शिशिरत्वम् । रक्षोघ्नत्वम् । व्रणशोधनत्वम् । पित्तास्रकफदोषनाशित्वम् । संग्राहित्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥

वानीरकः, पुं, ( वानीर इव प्रतिकृतिः । इवार्थे कन् । ) मुञ्जतृणम् । इति राजनिर्घण्टः ॥

वानीरजं, क्ली, कुष्ठम् । इति राजनिर्घण्टः ॥

वानेयं, क्ली, ( वने जले भवम् । वन+ढक् । ) कैवर्त्तीमुस्तकम् । इत्यमरः ॥

वान्तः, त्रि, वमितवस्तु । वमधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥ ( यथा, साहित्यदर्पणे ।
"कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते ॥")

वान्तादः, पुं, ( वान्तं अत्तीति । अद्+अण् । ) कुक्कुरः । इति त्रिकाण्डशेषः ॥

वान्तिः, स्त्री, ( वम्+क्तिन् । ) वमनम् । बाँति इति भाषा । यथा,—
"वान्तिरुल्लेखनं छर्द्दिर्वमनं वमथुर्व्वमिः ॥"
इति रत्नमाला ॥

वान्तिहृत्, पुं, ( वान्तिं हरतीति । हृ+क्विप् । ) लोहकण्टकवृक्षः । इति शब्दचन्द्रिका ॥ मयना इति भाषा ॥

वान्तिदा, स्त्री, ( वान्तिं वमनं ददातीति । दा+कः । टाप् । ) कटुकीवृक्षः । इति शब्दचन्द्रिका ॥

वान्या, स्त्री, ( वनानां समूह इति । वन+यत् । टाप् । ) वनसमूहः । इति शब्दरत्नावली ॥

वापः, पुं, वपनम् । वपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ ( यथा, महाभारते । ३ । ३४ । १९ ।
"कालं प्रतीक्षस्व सुखोदयस्य
पङ्क्तिं फलानामिव बीजवापः ॥"
मुण्डनम् । यथा, मनौ । ११ । १०९ ।
"उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत् ।
कृतवापो वसेद्गोष्ठे चर्म्मणा तेन संवृतः ॥"
उप्यते अस्मिन्निति । वप्+अधिकरणे घञ् । क्षेत्रं इति । ५।१।४५ । पाणिनीयसूत्रे भट्टोजिदीक्षितः ॥ तस्मादेदेयनं वापदण्डादिदर्शनात् ॥)

वापकः, त्रि, वपनकारयिता । ण्यन्तवपधातोः कर्त्तरि ण्वकप्रत्ययेन निष्पन्नः ॥

वापदण्डः, पुं, ( वापाय वपनाय दण्डः । ) वपनार्थदण्डः । बैँउ इति भाषा । तत्पर्य्यायः । वेमा २ । इत्यमरः ॥ वेम ३ वेमः ४ वायदण्डः ५ । इति भरतः ॥

वापिः, स्त्री, ( उप्यते पद्मादिकमस्यामिति । वप्+"वसिवपियजिराजिव्रजीति ।" उणा० ४ । १२४ । इति इञ् ।) वापी । इति भरतद्विरूपकोषः ॥

वापितं, त्रि, ( वप्+णिच्+क्तः । ) बीजाकृतम् । मुण्डितम् । इति मेदिनी । ते, १५० ॥ धान्यविशेषे, क्ली । वाओया धान इति भाषा । तस्य गुणाः ।
"वापितं गुरु तद्धान्यं किञ्चिद्धीनमवापितम् ॥"
इति राजवल्लभः ॥

वापी, स्त्री, ( वापि+कृदिकारादिति ङीष् । ) दीर्घिका । इत्यमरः । १ । १० । २८ ॥ उप्यते पद्मादिकं अस्याम् । वाप्यां वापिरपि स्मृता । इति द्विरूपकोषः ॥ इति तट्टीकायां भरतः ॥ * ॥ तस्या लक्षणं यथा । नयवर्द्धमानकृतो वशिष्ठः । शतेन धनुर्भिः पुष्करिणी । त्रिभिः शतैर्दीर्घिका । चतुर्भिर्द्रोणः । पञ्चभिस्तडागः । द्रोणाद्दशगुणा वापी । तेन चतुर्द्दिक्षु पञ्चत्रिंशद्धस्तान्यूनतायां द्वादशशतहस्तान्तरान्यूनत्वेन दीर्घिका । चतुर्द्दिक्षु चत्वारिंशद्धस्तान्यूनतायां षोड़शशतहस्तान्तरान्यूनत्वेन द्रोणः । चतुर्द्दिक्षु त्रिंशदधिकशतहस्तान्यूनतायां षोड़शसहस्रहस्तान्तरान्यूनत्वेन वापी । इति जलाशयोत्सर्गतत्त्वम् ॥ * ॥ तत्खननफलं यथा,—
"यो वापीमथवा कूपं देशे वारिविवर्ज्जिते ।
खानयेत् स दिवं याति बिन्दौ बिन्दौ शतं
समाः ॥"
इति कल्पतरौ वायुपुराणम् ॥
तज्जलगुणाः ।
"वाप्यं गुरु कटु क्षारं पित्तलं कफवातजित् ।"
इति राजवल्लभः ॥
तत्खनने दिङ्नियमो यथा,—
"वापीकूपतड़ागं वा प्रासादं वा निकेतनम् ।
न कुर्य्याद्दक्षिकामस्तु अनलानिलनैरृते ॥